# KERALA READER SANSKRIT

## III

## Part A

(For Academic and Sanskrit Schools)

STANDARD VII

1964

T38
K45

Donated By
Fr. A. Thamnippana

# संस्कृतपाठावलिः

## तृतीया

[For Academic and Sanskrit Schools]

DHARMARAM PONTIFICAL INSTITUTE
LIBRARY
BANGALORE

Price: Rs. 0.80

1964

S. P. I. LIBRARY
Acc. No 10026
Call No 738/K45

## PLEDGE

India is my country, all Indians are my brothers and sisters.

I love my country, and I am proud of its rich and varied heritage. I shall always strive to be worthy of it.

I shall give my parents, teachers, and all elders respect and treat everyone with courtesy. I shall be kind to animals.

To my country and my people, I pledge my devotion. In their well-being and prosperity alone lies my happiness.

©

The Government of Kerala


1964

# विषयाः


| | | Page |
|---|---|---|
| 1. | गजः | 1 |
| 2. | प्रमादस्य परिणामः | 6 |
| 3. | मयूरः | 12 |
| 4. | मतङ्गः शबरी च | 17 |
| 5. | पिता पुत्रश्च | 23 |
| 6. | आहारः | 31 |
| 7. | विनाशकाले विपरीतबुद्धिः | 37 |
| | सुभाषितानि । | 42 |
| | श्रीरामोदन्तः । | 43 |

## प्रथमः पाठः

# गजः



गजः कश्चन वन्यो मृगः । तं जना वनेभ्यो गृहीत्वा जनपदमानयन्ति । यथा जले विद्यमानेषु जन्तुषु तिमिङ्गिलः, तथा स्थले वर्तमानेषु गजो महत्तमः । स न शृङ्गी मृगः । शृङ्गे हि मस्तकादुत्पद्येते । गजस्यास्यादुद्गतौ यौ दृश्येते, तौ तस्य दन्तौ । अग्रे निशिताभ्यां कठिनाभ्यां ताभ्यां स कर्कशां शिलामपि पाटयेत् ।

दन्तयोर्मध्ये या दूरमधो लम्बते, सा तस्य नासा । शुण्डेति तां कथयन्ति । अस्माकं कर इव गजस्य शुण्डा उपकरोति । स तया भक्ष्याणि धृत्वा आस्यं नयति । भूमौ पतितां सूचीमपि तया समुद्धरेत ।

शुण्डाया अग्रे द्वे सुषिरे विद्येते । गजस्ताभ्यां जलमादाय पिबति । एवं द्वाभ्यां पानात्तस्य द्विप इति संज्ञा अजायत । गजस्य कर्णौ विशालौ । त्वक् परुषा कृष्णा च । तस्य स्त्रियं वशां व्याहरन्ति ।

शिक्षिता गजा आधोरणानां निदेशमनुसरन्ति । पूर्वं किल समरकर्मसु चातुर्यं प्रापिता अपि गजा आसन् । केरलेषु देवोत्सवे अलङ्कृतान् गजान् श्रेण्या स्थापयन्ति । मध्ये स्थापितस्योपरि देवमारोप्य पुरतो वाद्यानि वादयन्ति च । वाद्यानां ध्वनिमाकर्ण्य गजः कर्णौ चालयन् निभृतस्तिष्ठति । सर्पाणां गीतमिव स ध्वनिस्तस्यानन्दाय कल्पते ।

गजा वन्या अपि व्याघ्रादिवत् मांसं न भक्षयन्ति । किन्तु सस्यान्येव । कदल्याः फलम्, इक्षुः, नारिकेलं, गुडञ्च गजेभ्यो भृशं रोचन्ते ।

केषुचिदवसरेषु गजानां मदः प्रादुर्भवति । तदा ते आधोरणानां विधेया न भवेयुः, बहुधा प्रमाद्येरन्नपि । अतो मदकाले तानालानेषु निगडयन्ति ।

पांसुभिः स्नाने गजानां महती प्रीतिः । सम्यक् स्नपिता अपि पांसूनुत्कीर्य शरीरं मलिनयन्ति । अत एव 'गजस्नानं हि निष्फलम्' इति वागुदपद्यत ।

वर्णेन धवलः कोपि गजो दिवि विद्यत इति पुराणेभ्य अवगम्यते । ऐरावत इति तस्य नाम । तस्य हि चत्वारो दन्तास्सन्ति । स किल वाहनं देवेन्द्रस्य ।

ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।
पुष्पदन्तस्सार्वभौमः सुप्रतीकश्च दिग्गजाः ।

एते अष्टौ क्रमात् पूर्वादीनां दिशां धारका अप्युच्यन्ते ।

---

मतङ्गजो गजो नागः कुञ्जरो वारणः करी ।
आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ।

परिशीलनम्–(1)

I 'अस्माकं कर इव गजस्य शुण्डा उपकरोति'। उपकारप्रकारान् दर्शयत ।

II गजस्य द्विप इति संज्ञा कुतः अजायत ?

III गजस्यात्यन्तं प्रियाणि भक्ष्याणि कानि ?

IV 'गजस्नानं हि निष्फलम्' । कुतः ?

V 'तदा ते आधोरणानां विधेया न भवेयुः' । कदा ?

VI 'यथा, तथा' इति शब्दावुपयुज्य वाक्यं लिखत ।

VII रिक्तस्थानानि उचितैः पदैः पूरयत—

(i) शिक्षिताः — आधोरणानां — अनुसरान्ति ।

(ii) वाद्यानां — आकर्ण्य — कर्णौ — निभृतः — ।

VIII अपेक्षितानि रूपाणि ब्रूत—

(i) लम्बते — लङि, लोटि च ।

(ii) उद्धरेत् — लटि, लृटि च ।

(iii) तिष्ठति — लिङि, लिटि च ।

IX 'मध्ये स्थापितस्योपरि देवमारोप्य पुरतो वाद्यानि वादयन्ति' । भिन्नवाक्यानि कुरुत ।

X एकं पदं ब्रूत—

(i) वने भवः ।

(ii) अतिशयेन महान् ।

(iii) शृङ्गमस्यास्ति ।

(iv) चतुरस्य भावः ।

## गृहपाठः — (1)

### इकारान्तः पुंलिङ्गः (सखि)

| | | |
|---|---|---|
| सखा | सखायौ | सखायः |
| हे सखे | हे सखायौ | हे सखायः |
| सखायम् | सखायौ | सखीन् |
| सख्या | सखिभ्याम् | सखिभिः |
| सख्ये | सखिभ्याम् | सखिभ्यः |

| | | |
|---|---|---|
| सख्युः | सखिभ्याम् | सखिभ्यः |
| सख्युः | सख्योः | सखीनाम् |
| सख्यौ | सख्योः | सखिषु |

नकारान्तः नपुंसकलिङ्गः (अहन्)

| | | |
|---|---|---|
| अहः | अह्नी, अहनी | अहानि |
| हे अहः | हे अह्नी, हे अहनी | हे अहानि |
| अहः | अह्नी, अहनी | अहानि |
| अह्ना | अहोभ्याम् | अहोभिः |
| अह्ने | अहोभ्याम् | अहोभ्यः |
| अह्नः | अहोभ्याम् | अहोभ्यः |
| अह्नः | अह्नोः | अह्नाम् |
| अह्नि, अहनि | अह्नोः | अहस्सु |

'आस्' आत्मनेपदी — लट्

| | | |
|---|---|---|
| आस्ते | आसाते | आसते |
| आस्से | आसाथे | आध्वे |
| आसे | आस्वहे | आस्महे |

———

## द्वितीयः पाठः

# प्रमादस्य परिणामः



कस्मिंश्चन विशाले सरसि कोपि कूर्मस्तस्य सखायौ हंसौ च प्रत्यवसन् । एकदा तस्य तीरेण गच्छन्तो धीवराः मिथो जगदुः । "समृद्धोऽयं जलाशयो नानाजातीयैर्मत्स्यैः कूर्मैश्च ।

तदिह श्व एवागच्छेम" इति । तदाकर्ण्य रहसि कूर्मो हंसाववदत् ।

कू :— सुहृदौ! किन्न श्रुतो भवद्भ्यां धीवराणामालापः?

हं :— श्रुत एव ।

कू :— किं मया प्राणरक्षार्थं कर्तव्यम्?

हं :— आवामपि तदेव चिन्तयावः । सावधानमालोचनीयम् ।

कू :— मा मैवम् । सद्य एव हि प्रतिविधेया विपदः । उपेक्षा नूनमनुतापं जनयेत् ।

हं :— उपेक्षा अनुतापायेति ज्ञायत एव । परन्तु प्रतिविधेरुपाय-मनुपलभ्य सद्य एव किं वा क्रियते? उपायस्सावधानमेव चिन्तनीयश्च ।

कू :— श्वः प्रत्यूष एव ते घातुका आगमिष्यन्ति । एवं भयस्या-त्यन्तमासन्नतया अद्यैवोपायो द्रष्टव्यः ।

हं :— तदपि सत्यमेव । अपि नाम भवानुत्प्रेक्षते कञ्चिदुपायम्?

कू :— जलाशयमन्यं गच्छामीति मे मनीषा । तेनैव मे कुशलं भवेत् ।

हं :— जलचरेण भवता स्थले सरता बहुभिरहोभिरेव शक्यते जलाशयान्तरं प्राप्तुम् । मार्गे विपदस्सम्भावनीयाश्च ।

कू :— नहि नहि स्थलेन गन्तव्यम् । किन्तु विहायसैव ।

हं :— कथं वा पक्षौ विना विहायसा गन्तुं प्रभवसि?

कू :— अस्ति तत्रापि कश्चिदुपायो मया दृष्टः।

हं :— स कः?

कू :— कस्यचित्काष्ठस्य मध्यमहं दृढं दशन् वर्तिष्ये। भवन्तौ च तदग्रयोश्चञ्चुभ्यां गृहीत्वा डयेताम्। एवं कृते शीघ्रमेव सुप्रापमभयस्थानम्।

हं :— अपूर्वं दर्शनम्। समीचीनञ्च। किन्तु उपायं चिन्तयता अपायोऽपि चिन्तनीयः।

कू :— को नाम अपायोऽत्र सम्भाव्यते?

हं :— आवाभ्यां नीयमानस्त्वं सन्दष्टे काष्ठे लम्बमानो हि स्थास्यसि। यदि कदाचन दंशस्य गाढतायां प्रमादी स्याः, तर्हि भयानको भवेदेवापायः।

कू :— अये! इयं वा युवयोर्भीतिः?

हं :— इयमेव।

कू :— तर्हि तां सर्वथा परित्यजतम्। न खलु स्तनन्धयः शिशुरस्मि। अवहित एव वर्तिष्ये।

हं :— अयन्तव निश्चयो यदि सुदृढः, तर्हि कार्यं सुघटम्। इतः क्रोशाभ्यामन्तरिता कापि वापी आस्ते। श्वः प्राह्ण एव तां नेष्यावः

कूः— भवतोस्सौहार्देन बाढं धन्योऽस्मि । परेद्युश्च यथानिश्चयं हंसौ कूर्मं नयमानावास्ताम् । जानपदा जनास्तथाविधौ तावपश्यन् । "पश्यत, पश्यत, इदमदृष्टपूर्वमाश्चर्यम्" इति महान्तं कोलाहलमकुर्वत च । तमाकर्ण्य मूर्खः कूर्मः "भुवि केयं घोषणा" इति प्रष्टुं मुखं व्याददानो हन्त भूमौ पपात । निर्दयं व्यापादितश्चाभूत् ।

---

उपायं चिन्तयन् धीमानपायमपि चिन्तयेत् ।
हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः ।
कूर्मे कमठकच्छपौ । कैवर्ते दाशधीवरौ ।

परिशीलनम्–(2)

I 'सद्य एव प्रतिविधेया विपदः' । कस्येदं वचनम् ? का विपदुपस्थिता ?

II 'अस्ति तत्रापि कश्चिदुपायो मया दृष्टः' । कुत्र क उपायः कूर्मेण दृष्टः ?

III 'उपायं चिन्तयता अपायोपि चिन्तनीयः' । हंसाभ्यां कीदृश अपाय आशङ्कितः ?

IV हंसाभ्यां नीतस्य कूर्मस्य प्रमादात् किं संवृत्तम् ?

V रेखास्थानेषूचितानि पदानि योजयत —

(i) कथं — विना — गन्तुं — ।

(ii) — काष्ठस्य — अहं — दशन् — ।

VI अपेक्षितानि लकाररूपाणि ब्रूत —

(i) कुर्वीत — लटि, लटि च ।

(ii) प्रभवति — लङि, लिङि च ।

(iii) स्याः—लटि, लङि च ।

(iv) स्थास्यति — लटि ।

VII 'यदि, तर्हि' इमे उपयुज्य वाक्यं रचयत ।

VIII शोधयत—

(i) अपि नाम भवानुत्प्रेक्षसे कञ्चिदुपायम् ?

(ii) यदि भवतोः रोचते ।

IX एकं पदं ब्रूत—

(i) सुतरां दृढः

(ii) जनपदे भवः

(iii) कालमनतिक्रम्य

## गृहपाठः—(2)

युज उभयपदी । आत्मनेपदे लट् ।

| | | |
|---|---|---|
| प्र. पु – युङ्क्ते | युञ्जाते | युञ्जते |
| म. पु – युङ्क्षे | युञ्जाथे | युङ्ग्ध्वे |
| उ. पु – युञ्जे | युञ्ज्वहे | युञ्ज्महे |

चक्ष् आत्मनेपदी लट् ।

| | | |
|---|---|---|
| प्र. पु – आचष्टे | आचक्षाते | आचक्षते |
| म. पु – आचक्षे | आचक्षाथे | आचढ्वे |
| उ. पु – आचक्षे | आचक्ष्वहे | आचक्ष्महे |

ब्रू उभयपदी । आत्मनेपदे लट् ।

| | | |
|---|---|---|
| प्र. पु – ब्रूते | ब्रुवाते | ब्रुवते |
| म. पु – ब्रूषे | ब्रूवाथे | ब्रूध्वे |
| उ. पु – ब्रूवे | ब्रूवहे | ब्रूमहे |

परस्मैपदे लट् ।


| | | |
|---|---|---|
| प्र. पु – ब्रवीति, आह | ब्रूतः, आहतुः | ब्रूवन्ति, आहुः |
| म. पु – ब्रवीषि, आत्थ | ब्रूथः, आहथुः | ब्रूथ |
| उ. पु – ब्रवीमि | ब्रूवः | ब्रूमः |

रुध् उभयपदी । परस्मैपदे लट् ।

| | | |
|---|---|---|
| प्र. पु – रुणाद्धि | रुन्धः | रुन्धन्ति |
| म. पु – रुणात्सि | रुन्धः | रुन्ध |
| उ. पु – रुणध्मि | रुन्ध्वः | रुन्ध्मः |

## तृतीयः पाठः

# मयूरः



सन्ति परस्सहस्रा पक्षिजातयो भारते वर्षे । तासु मयूरजातिरितराभ्यः प्रकृष्यते चारुतया । शिरसि नीला शिखा, शबलः कण्ठः, चन्द्रकैरञ्चितो बर्हभारश्च मयूराणामाकारं नयनयोरासेचनकं कुर्वन्ति । शिखीति बर्हीति च मयूरनामनी शिखाया बर्हस्य च प्राशस्त्यं गमयतः ।


सुरूपताया अनुरूपायां लास्यकलायाम् अशिक्षितपटवश्च भवन्ति मयूराः । ते हि प्रावृषेण्यानां मेघानामुदये केकामालपन्तो नृत्यन्ति ।

मयूरे सविशेषां प्रतिपत्तिं जना बहुधा व्यञ्जयन्ति। मृत्तिकया, शिलया, दारुणा, लोहेन च मयूरान्निर्माय गृहद्वारे निवेशयन्ति। गृहभित्तीः तच्चित्रैरलङ्कुर्वन्ति। बर्हैस्तालवृन्तानि विरचय्य महोत्सवेषूपयुञ्जते। चक्रवर्तिनः षाजहानस्य मयूरसिंहासनं विश्वविश्रुतमेव। दृश्यते चेह प्रचुरः प्रचारो मयूरनृत्तस्य।

न केवलं मानवानां, देवानामपि अन्यादृशी प्रीतिरमीषु विज्ञायते। कार्तिकेयः शिखिवाहनः किलाख्यायते। विद्यानामधिदेवतां सरस्वतीं मयूरवाहनामाचक्षते। भगवतो वासुदेवस्य प्रियतरमुत्तंसं पिञ्छं ब्रुवते।

मयूरा वनेषु जायन्ते, जीवन्ति च। ततो गृहीत्वा जनपदमानीताः तत्र तत्र दृश्यशालासु पोष्यन्ते। एतेषां वंशः क्रमशः क्षीयमाणः किलास्ते। अन्येषां वन्यजन्तूनामपि इमामेव दशां कथयन्ति। सिंहाः, गजाः, खड्गिनः भल्लूकाः वृकाः शरभाः, शल्याः, सैरिभा एवमादीनां मृगाणां, अजगरादीनां भोगिनाञ्च सङ्ख्या अपचयमेव खलु दिने दिने प्रपद्यते। केषाञ्चन वंशो विच्छिन्नप्राय इति च श्रूयते। स्वेच्छया मृगयामिह हन्तुं व्याहरन्ति। इदानीमस्मिन् विषये राष्ट्रनेतारः श्रद्दधाना दृश्यन्ते। स्वच्छन्दां

मृगयां यथेच्छं वनानामुच्छेदञ्च ते निरुन्धन्ति । तत्र तत्र वन्य-जीविनां रक्षास्थानानि स्थापयन्ति च ।



सर्वतो वनानां विनाशने हि नूनं वन्यैर्विभवैः परिहीणाः स्याम । जानपदा इव वन्या अपि विविधा विभवा विद्यन्ते । उभयाश्रयिणी चास्माकं जीवितयात्रा । जीविते त्रितयं हि मुख्यं कार्येषु, आहारः, आवासः आरोग्यञ्च । तत्राहारः कृषि-भिरुत्पाद्यमानैः जानपदैर्विभवैः निरुह्यते । आवासश्च सोपकरणः भूयसा दारुभिर्निर्मीयते । ते चारण्येभ्य आनीयन्ते । तथा आरोग्यप्रदा वीर्योत्तरा महौषधयश्च । तस्मादस्माभिरवश्यमवधातव्यं वनानां संरक्षणे ।

—·—

मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् ।
तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् ॥

परिशीलनम्——(3)

I मयूरस्याकारः कैरासेचनकः क्रियते ?

II 'मयूराः केकामालपन्तो नृत्यन्ति'। कदा ?

III मयूरे सविशेषां प्रतिपत्तिं जना बहुधा व्यञ्जयन्ति'। व्यञ्जनप्रकाराः के ?

IV 'देवानामप्यन्यादृशी प्रीतिरमीषु विज्ञायते'। कथं विज्ञायते ?

V वन्यमृगाणां क्रमिके वंशक्षये को हेतुस्सम्भाव्यते ? तन्निवारणाय राष्ट्रनेतारः किं कुर्वन्ति ?

VI 'तस्मादवश्यमवधातव्यमस्माभिः वनानां संरक्षणे।' कस्मात् ?

VII रेखास्थानेषूचितानि पदानि योजयत :—

(i) तासु——इतराभ्यः——चारुतया ।

(ii) जानपदाः——वन्याः——विविधाः——विद्यन्ते ।

(iii) स्वच्छन्दां——यथेच्छं——उच्छेदश्च——निरुन्धन्ति ।

III पदानि विश्लेषयत :—

(i) मैवम् (iii) तदैव

(ii) तदपि सत्यमेव (iv) अद्यैव

IX सन्धत्त :—

(i) शिखी + इति (iv) वन्याः + अपि

(ii) तत्र + चित्रम् (v) आवासः + च ।

(iii) वन्यैः + विभवैः

X एकं पदं ब्रूत :—

(i) शिखा अस्यास्ति (ii) प्रावृषि भवः ।

## गृहपाठः— (3)

'भी' परस्मैपदी लट्

| | | |
|---|---|---|
| प्र. पु—बिभेति | बिभीतः, बिभितः, | बिभ्यति |
| म. पु—बिभेषि | बिभीथः, बिभिथः | बिभीथ, बिभिथ : |
| उ. पु—बिभेमि | बिभीवः, बिभिवः | बिभीमः, बिभिमः |

'ज्ञा' उभयपदी । आत्मनेपदे लट् ।

| | | |
|---|---|---|
| जानीते | जानाते | जानते |
| जानीषे | जानाथे | ज्ञानीध्वे |
| जाने | जानीवहे | जानीमहे |

कर्तरि कर्मणि च रूपभेदेष्ववधत्त—

(i) आहारं निर्वहति—आहारः निरुह्यते ।

(ii) आवासं निर्माति—आवासः निर्मीयते ।

(iii) दारूनानयति —दारवः आनीयन्ते ।

---

# चतुर्थः पाठः

## मतङ्गः शबरी च



महामुनिर्मतङ्गः तपश्चरन् वने न्यवसत् । तस्य तपोवनस्य विदूरे क्वापि कोणे काचन शबरी चावर्तत । तस्याः कौमार एव

पित्रोर्विपत्त्या न कोप्यासीत्स्वीयो नाम । निरालम्बा निर्विनोदा च सा निर्वेदं प्रपन्नेव केवलेन फलेन मूलेन वा जीवन्ती कथञ्चन दिनान्यनयत् ।

एकदा वने पर्यटन्ती सा मध्याह्ने यदृच्छया मतङ्गमुनेराश्रमपरिसरमाससाद । तदैव माध्यन्दिनाय नियमाय महर्षिर्नदीं प्रतिष्ठमानश्चासीत् । शबरी तं दूरादवालोकयत् । “अहो ! क एष सौम्यानां तेजसां राशिः ? अपि नाम मध्याह्ने भुवि पूर्णचन्द्रः प्रकाशते ? ” एवं वितर्कयन्ती तमेव विस्मयेन वीक्षमाणा सा चित्रार्पितेव निष्पन्दातिष्ठत् । तावत्तस्या नयने तस्मान्न प्रत्यावर्तेताम् , यावत्स तयोरगोचरो बभूव । अथ सा तमेव स्मरन्ती साञ्जलिबन्धं नमस्कृत्य स्वस्थानमगच्छत् । परेद्युरपि तद्दिदृक्षया प्रेरिता सा तस्मिन्नेव समये तमेव प्रदेशं प्राप । अवाप चाभीष्टम् । एवं दिने दिने तस्या मुनिदर्शने कौतुकं दर्शने दर्शने तस्मिन् भक्तिश्च प्रावर्धत । कान्नाम सपर्यामस्य कुर्यामिति सोत्कण्ठा चाभूत् ।

अथैकस्मिन्नहनि सा मुनेः प्रस्थानकालात् प्रागेव शुष्काणि पर्णानि, तृणानि, पाषाणशकलानि चापाकृत्य नदीं यावत्तस्य मार्गमशोधयत् । दूरे वृक्षेणान्तर्हिता तस्थौ च । यथाकालं नदीं प्रस्थितो मतङ्गः पदवीमपूर्वपरिशुद्धिं पश्यन् विस्मितोऽभवत् । केनेदं कृतमिति जिज्ञासुः परितो वीक्षमाणोऽपि न कंचिदैक्षत । शबरी तु तस्य मुखप्रसादमालक्ष्य कृतार्था ततो निरगच्छत् । अन्वहं मार्गपरिशोधने परामास्थां दधौ च ।

अथ तावता तृप्तिमलभमाना सा निशीथे मतङ्गाश्रममेत्य चत्वरमपि विशोध्यापासरत् । सुप्तोत्थितो मुनिरङ्कणं सम्मृष्टं संसिक्तञ्च विलोक्य पूर्वाधिकं व्यस्मयत । अनन्तरेष्वपि प्रभातेषु सैवादृश्यत समवस्था । किमियं कस्यचन माया स्यात् ? उत मे विभ्रान्तिस्स्यात् ? आहोस्विददृश्यरूपासु वनदेवतासु कस्याश्चित् प्रसादो भवेत् ? इति बहुधा विकल्पयन्मुनिः परीक्षितुं मतिमतनोत् । रात्रौ कुत्रचिन्निलीय निर्निद्रस्तस्थौ च ।



निशीथे तेन काचिदञ्जननीला तरुणी दूरादागत्य निश्शब्द-मङ्कणं शोधयन्ती ददृशे । मुनिस्तामुपसृत्यापृच्छत् । का त्वमिति ।

मुनिं दृष्ट्वा भीतभीता सा सुदूरमपसृत्य सविनयमूचे । " भगवन् ! क्षन्तव्यो दास्या ममायमपराधः " इति । " भद्रे ! कथमपराध इत्युच्यते । आराधना खलु त्वया क्रियते । किमिति बिभेषि ? ब्रूहि । का त्वम् ? कुतश्च ममाप्रकाशमेव एवमुपकरोषि !

एवमनुयुञ्जानं सा पुनरवदत—" भगवन् ! अहमस्मि जात्या शबरी । भवामि च यथाशक्ति भवतः सेवायां निकाममुत्कण्ठिता । सुदूरमुत्सार्यमाणा नीचा मे जातिरिति एवमप्रकाशं निषेवे । अनर्हं यदि मया कृतं, तर्हि तन्मृष्यतामनुकम्पिना भगवता " इति ।

प्रकामं प्रसन्नो मुनिरुवाच—" भद्रे ! नानर्हं त्वया क्रियते । न च ममाननुमतम् । एषा जातिपिशाची केवलमज्ञान् कर्मसङ्गिनो बाधितुं प्रभवति । न तु ज्ञानिनो मादृशान् । वयं हि सर्वत्र साम्य-दर्शिनः । तदात्मनो जात्या नीचतामनुचिन्त्य भीता विषण्णा वा मा भूः । ममोपक्रियायां कुतूहलिनी चेदसि, इहैवाश्रमे मे वर्तस्व । नात्र कश्चि-न्निरोधः । जाने योगिभिरपि दुर्लभं श्रेयस्तव भावीति । लोकानुग्रहाय भगवान् दाशरथिरवतरिष्यति । स त्वां परमं पदं प्रापयिष्यति । अत-स्समाहिता तदनुसन्धाने निरता तावत्कालं वर्तस्व । " इति । एवं मुनेर्वाचं निशम्य सन्तुष्टा शबरी तद्दास्यं पूर्ववत्कुर्वाणा भगवति दृढ-भक्तिः स्वस्थानमेवाध्यवसत् ॥

पूजार्हेषु कृता पूजा न हि वन्ध्या कदाचन

## परिशीलनम्—(4)

I शबरी कुत्रावर्तत? तस्या मतङ्गदर्शनं कथं समभूत्?

II मुनेः सपर्यायां सोत्कण्ठा शबरी कीदृशीं सपर्यामकरोत्?

III 'इति बहुधा विकल्पयन्मुनिः'। मुनेर्विकल्पाः के?

IV 'एवमनुयुञ्जानं मुनिं सा पुनः प्रत्यवदत्'। अनुयोगः कः? प्रतिवचनञ्च किम्?

V 'यथाकालं नदीं प्रस्थितो मतङ्गः पदवीमपूर्वपरिशुद्धिं पश्यन विस्मितोऽभवत्'। वाक्यत्रयं कुरुत।

VI शबर्या जातिनीचताबुद्धिं कथं मुनिरपाकरोत्?

VII यावत्तावत्पदे घटयित्वा वाक्यं निष्पादयत।

VIII प्रयोगविपरिणामं कुरुत-- (i) सा दिनानि अनयत्।

(ii) मुनिः तामपृच्छत्।

IX एकं पदं ब्रूत— (i) द्रष्टुमिच्छा। (ii) अहन्यहनि।

## गृहपाठः--(4)

सकारान्तः पुंलिङ्गः—( उपेयिवस् )

| | | |
|---|---|---|
| उपेयिवान् | उपेयिवांसौ | उपेयिवांसः |
| हे उपेयिवन् | हे उपेयिवांसौ | हे उपेयिवांसः |
| उपेयिवांसम् | उपेयिवांसौ | उपेयुषः |
| उपेयुषा | उपेयिवद्भ्याम् | उपेयिवद्भिः |

| | | |
|---|---|---|
| उपेयुषे | उपेयिवद्भ्याम् | उपेयिवद्भ्यः |
| उपेयुषः | उपेयिवद्भ्याम् | उपेयिवद्भ्यः । |
| उपेयुषः | उपेयुषोः | उपेयुषाम् |
| उपेयुषि | उपेयुषोः | उपेयिवत्सु |

'क्री' उभयपदी—परस्मैपदे लिङ्

| | | |
|---|---|---|
| क्रीणीयात् | क्रीणीयाताम् | क्रीणीयुः |
| क्रीणीयाः | क्रीणीयातम् | क्रीणीयात |
| क्रीणीयाम् | क्रीणीयाव | क्रीणीयाम |

'शक' परस्मैपदी—लट्

| | | |
|---|---|---|
| शक्नोति | शक्नुतः | शक्नुवन्ति |
| शक्नोषि | शक्नुथः | शक्नुथ |
| शक्नोमि | शक्नुवः | शक्नुमः |

'अस्' परस्मैपदी—लोट्


| | | |
|---|---|---|
| अस्तु | स्तां | सन्तु |
| एधि | स्तम | स्त |
| असानि | असाव | असाम |

'धा' उभयपदी—आत्मनेपदे लट्

| | | |
|---|---|---|
| धत्ते | दधाते | दधते |
| धत्से | दधाथे | दध्वे |
| दधे | दध्वहे | दध्महे |

## पञ्चमः पाठः

# पिता पुत्रश्च



पिता :— वत्स ! गच्छ मातुरन्तिकम् । अहं विपणिं गच्छामि ।

पुत्र :— किमर्थम् ?

पि :— सन्ति कानिचित्तत: क्रेयाणि ।

पु :— अहमप्यनुगच्छामि

पि :— तावद्दूरं चरितु त्वन्न शक्नोषि ।

पु :— कियदास्ति दूरम् ?

पि :— इतो देवालयं प्रति कियद्दूरमस्तीति जानासि खलु ।

पुः— जानाम्येव । मासे मासे जन्मनक्षत्रे देववन्दनाय तत्र मां नयति हि माता । किन्तावदेव ?

पि :— ततस्त्रिगुणम् ।

पु :— ननु तावदेव । निरायासश्चरेयम् ।

पि :— धीरोऽसि । इदमन्यत्तु विद्यते प्रष्टव्यम् ।

पुः— किन्तत् ?

पि :— विपण्यां शिशूनां विलोभनानि बहूनि तत्र तत्र दृश्येरन् तत्तत्प्रार्थनाभिः किं मामाकुलयिष्यसि ?

पु :— न; न । सुलभञ्चेत् कन्दुकमेकं क्रीणीयामिति तु स्पृहयामि ।

पि :— भवतु । तां स्पृहां नूनं पूरयिष्यामि । मातरमापृच्छ्य शीघ्रमागच्छ ।

II

पि :— कुमार ! नगरवीथीं उपेयिवांसौ स्वः । वीथ्याः पार्श्वयोः वर्तनी वर्तेते । ताभ्यामेव पथिकैरटितव्यम् । तदितस्ततो मा श्रम । मम हस्तं दृढमवलम्ब्य शनैश्चर ।

पु :— किं वीथीपार्श्वेषु सर्वत्र वर्तन्यः स्युः ?

पि :— नगरेषु प्रायेण स्युः । यत्र तु न स्युः तत्र वीथ्याः पार्श्वाभ्यां गन्तव्यम् ।

पु :— पश्य पश्य तात ! अग्रतः पृष्ठतश्च तारस्वराणि वाहनानि पङ्क्तिश आयान्ति यान्ति च ।

पि :— एवं वीथ्याः सङ्कुलत्वादेव जनानां सञ्चारसौकर्याय वर्तनी निर्मिता ।

पु :— अतिमहान्ति अत्यन्तं जवनानि चामीषु बहूनि भुवं कम्पयन्तीव ।

पि :— इतोऽप्यधिकजवेन तानि नेतु शक्यन्ते । परन्तु आपद्भयेन गतिजवं नगररक्षिणो नियमयन्ति ।

पु :— अतश्च वेगवर्धने वाहननेतॄणां स्वाच्छन्द्यं नास्तीत्यायातम् ।

पि :— एवमेव ।

पु :— तर्हि कानिचिदेतेषु समत्सराणीव द्रुततरं प्रधाव्य अन्यानि पश्चात् कुर्वन्तीति कथं युज्यते ?

पि :— कार्यगौरवात् केषाञ्चन त्वरिततरा गतिराश्रयणाया स्यात् तादृशानि विरावैः संज्ञापयन्ति । तानाकर्ण्य पुरस्सराणि यानानि स्वां गतिं मन्दीकृत्य दक्षिणतो निष्क्रमणावकाशं दिशन्ति ।

पु :— यदि न दिशेयुः ?

पि :— व्यवस्था लङ्घिता स्यात् । ततो दण्डश्च प्रसज्येत ।

पु :— एवमवकाशदानमुद्दिश्यैव रथ्याः विस्तृताः कृता इति तर्कयामि ।

पि :— साधूपलक्षितं वत्सेन ।

पु :— तात ! क्व पुनर्विपणिः ?

पि :— सन्निकृष्टैव । अपि ते पादौ व्यथेते ?

पु :— न हि; न हि । दर्शने औत्सुक्येन केवलं पृच्छामि ।

पि :— अस्तु । इह वृक्षस्य मूलवेदिकायां मुहूर्तमुपविश्य गच्छावः ।

पु :— रमणीया वेदिका । प्रियं मे अत्रोपवेशनम् ।



III

पि :— पुत्र ! इयं विपणिः । प्रेक्षस्व विविधैः पण्यविस्तरैः परिपूरितान् रथ्यामुभयतो महाप्रमाणानापणान् ।

पु :— प्रेक्षे; सकौतुकं प्रेक्षे । पश्य तात ! पुरतो रथ्याया मध्ये वृतेरन्तः कोऽपि रक्षिपुरुषः उन्नतं कुट्टिममधिरूढस्तिष्ठति । इतस्ततो वलमानः पाणी विक्षिपति च ।

100२६



पि:— तत्र काचिदन्या वीथी तिरश्चीना अनया मिलति । एवं द्वयोर्मेलनेन निष्पन्नस्य चतुष्पथस्य मध्ये स तिष्ठति चतुर्भिर्मार्गैस्समापततां वाहनानां गतिं क्रमीकुरुते च। अन्यथा हि सङ्कुलता स्यात् ।

पु:— स हि करे सलेखं किमपि वृत्तं धत्ते ।

पि:— धत्ते । तदुन्नमय्य दर्शयन् स वाहनानि स्थापयति । अवनमय्य च विसृजति । तस्यानुज्ञया विना वाहनानि न नेयानीति नीतिमर्यादा ।

पु:— चतुष्पथेषु वीथीनामतिक्रमणे पादचारिभिरपि विशिष्यावधानं कार्यं स्यादिति मन्ये ।

पि:— कार्यमेव । चतुर्भ्यो भागेभ्योऽपि हि वाहनान्यागच्छेयुः। वत्स! इतः प्रत्यासन्नादापणात् क्रेयाणि क्रीत्वा निवर्तावहे ।

पु:— कन्दुकं कुतः क्रीयते?

पि:— इत एव । तदपीह वर्तते ।

पु:— पितः! अस्ति परतोऽपि दर्शने मम महत् कुतूहलम् ।

पि:— वत्स! दिनान्तरे त्वामानीय दर्शयिष्यामि ।

पु:— एवं भवतु ।

आत्मजस्तनयस्सूनुः सुतः पुत्रः स्त्रियान्त्वमी।
आहुर्दुहितरं सर्वे अपत्यं तोकं तयोस्समे ॥
आपणस्तु निषद्यायां विपणिः पण्यवीथिका ।

D. P. I. LIBRARY
BANGALORE-29.

## परिशीलनम्—(5)

I 'तां स्पृहां नूनं पूरयिष्यामि' कां स्पृहाम् ?

II नगरवीथीं प्रविष्टः पिता पुत्रं किं प्रत्यबोधयत् ?

III वीथ्याः पार्श्वयोः वर्तन्यः किमर्थं निर्मीयन्ते ?

IV वाहनानां गतिवेगस्यानियमने सम्भाव्यमानो दोषः कः ?

V पश्चादागच्छतां वाहनानां निष्क्रमणावकाशः कदा दातव्यो भवेत् ? अदाने च को दोषः ?

VI चतुष्पथस्य मध्ये कुट्टिमस्थो रक्षिपुरुषः किं कुरुते ?

VII विपरिणमयत :—

(i) अहं विपणिं गच्छामि ।

(ii) माता मां नयति ।

(iii) नगररक्षिणः गतिजवं नियमयन्ति ।

(iv) स पाणी विक्षिपति ।

VIII भिन्नवाक्ये कुरुत :—

(i) मातरमापृच्छ्य शीघ्रमागच्छ ।

(ii) कानिचित् द्रुततरं प्रधाव्यान्यानि पश्चात्कुर्वन्ति ।

## गृहपाठः—(5)

### 'हन्' परस्मैपदी – लट्

| | | |
|---|---|---|
| हन्ति | हतः | घ्नन्ति |
| हंसि | हथः | हथ |
| हन्मि | हन्वः | हन्म |

‘चि’ उभयपदी – परस्मैपदे लट्

| | | |
|---|---|---|
| चिनोति | चिनुतः | चिन्वन्ति |
| चिनोषि | चिनुथः | चिनुथ |
| चिनोमि | चिनुवः, चिन्वः | चिनुमः चिन्मः |

‘रुध’ उभयपदी – परस्मैपदे लट् ।

| | | |
|---|---|---|
| रुणद्धि | रुन्धः | रुन्धन्ति |
| रुणत्सि | रुन्धः | रुन्ध |
| रुणध्मि | रुन्ध्वः | रुन्ध्मः |

‘धा’ उभयपदी – परस्मैपदे लट् ।

| | | |
|---|---|---|
| दधाति | धत्तः | दधति |
| दधासि | धत्थः | धत्थ |
| दधामि | दध्वः | दध्मः |

‘न’ कारान्तः पुलिंगः – (युवन्) ।


| | | |
|---|---|---|
| युवा | युवानौ | युवानः |
| हे युवन् | हे युवानौ | हे युवानः |
| युवानम् | युवानौ | यूनः |
| यूना | युवभ्याम् | युवभिः |
| यूने | युवभ्याम् | युवभ्यः |
| यूनः | युवभ्याम् | युवभ्यः |
| यूनः | यूनोः | यूनाम् |
| यूनि | यूनोः | युवसु |

'स' कारान्तः पुलिंगः – ( विद्वस् )।

| | | |
|---|---|---|
| विद्वान् | विद्वांसौ | विद्वांसः |
| हे विद्वन् | हे विद्वांसौ | हे विद्वांसः |
| विद्वांसम् | विद्वांसौ | विदुषः |
| विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| विदुषः | विदुषो : | विदुषाम् |
| विदुषि | विदुषोः | विद्वत्सु |

# षष्ठः पाठः

## आहारः



'अन्ने प्रतिष्ठिता लोकाः' इतीदं वचनमाहारस्य महिमानं प्रत्याययति। न खलु शरीरमन्तरा प्राणिनां प्राणधृतिः सम्भवति। शरीरस्थितेश्च मूलमाहारः।

आहारः शरीरस्य वृद्धिं बलमोजश्च जनयति। उत्साहं कर्मसु सामर्थ्यञ्च उत्पादयति। आहारस्याभावे इन्द्रियाणि शरीरञ्च सादं प्रपद्यन्ते। जाड्यमालस्यं च जायेते। जाठरो वह्निश्च मन्दतां भजते।

आहारस्य काले मात्रायाश्च सविशेषा श्रद्धा विधेया भवति। प्राग्भुक्तस्य विपाकात्परमेव पुनराहारं कुर्यात। विशुद्ध उद्गारः, शरीरस्य लाघवं, करणानां प्रसादः क्षुच्च भुक्तस्य विपाकं गमयन्ति। स एव च काल आहारस्य। अजीर्णे भोजनं विषं सङ्गिरन्ते। काले अनशनमिव अकाले अशनमपि आरोग्यं विनिहन्ति। बुभुक्षितस्यापि सन्ध्यास्वभ्यवहारं नानुमन्यन्ते वैदिका वैद्याश्च।

मात्रा तु भोजनस्य भोक्तुरवस्थाविशेषान् भोज्यस्य लाघव-गौरवे च समालोच्य कल्पनीया। न खलु शिशूनां यूनां प्रवयसाञ्च समाना मात्रा कल्पयितुं युक्ता। नापि स्वस्थानामातुराणाञ्च। तस्मादवस्थाविशेषानालोच्य यथोचितं मात्राव्यवस्था कर्तव्या। गुरूणां भोज्यानामर्धसौहित्यं, लघूनां नातितृप्तिञ्च मात्राप्रमाणं निर्दिशन्ति शारीरशास्त्रविदः। हीनमात्रं भोजनं शरीरस्य बल-मोजश्च वर्धयितुन्न पर्याप्नोति। अतिमात्रं तु बलौजसी विनाश्य रोगानुत्पादयेत्।

सात्त्विकः, राजसः, तामस इति त्रिधा विभक्त आहरः- सरसं, स्निग्धं, पथ्यं, हृद्यं मधुरप्रायञ्चाहारं सात्त्विकं कीर्तयन्ति। एष तुष्टिं, पुष्टिं मनःप्रसादं बुद्धिमायुश्च वर्धयति। रसैः कट्वम्ल लवणैरुद्बणा अत्युष्णा रूक्षविदाहिनश्चाहारा राजसा गण्यन्ते। एते प्राय आमयान् वपुषि, दम्भदर्पादीन् मनसि च जनयन्ति। यत्तु भोजनमशुचि पर्युषितं गतरसमुच्छिष्टञ्च तत्तामसमुदाहरन्ति। तेन निद्रा आलस्यं प्रमाद इत्यादयोऽपि जायन्ते। एतेषु सात्त्विक उत्तमः, राजसो मध्यमः तामसञ्चाधमः।

भक्ष्येषु यानि वर्जनीयानि परिसङ्ख्यायन्ते, तानि मांसमद्यादीनि तामसेष्वन्तर्भवन्ति । पोषकमपि बलप्रदमपि मांसं हिंसानुबन्धादधर्म्यमिति निषिद्धाशनं भवति । मद्यञ्च भूयसां दोषाणामायतनमिति वर्जनीयमाख्यातम् । तत् खलु पीतं मोहे महातमसि मनो भ्रामयति । विवेकं विकलयति । लज्जां मार्जयति । मानं लीनं कुरुते । भद्राणि विद्रावयति । आढ्यमपि गुणिनमपि विद्वांसमपि मद्यप्रणयिनं लोकास्तूलेन तुलयन्ति । पूतिना मद्यगन्धेनोद्विग्नेव तस्य श्रीस्सुदूरं प्रद्रवति । गुणाः ह्रीणा इवापरावर्तमानाः पलायन्ते । विद्या विप्रलब्धेव खिद्यति । दीर्घैरुद्गारैस्स बहिरुत्सारयतीवान्तरं सत्त्वम् । घूर्णमानाभ्यां कलुषाभ्यामक्षिभ्यां विवृणोतीव बन्धूनां मनसो वैवश्यं कालुष्यञ्च । शिरसश्चालनैरभिनन्दतीव रोगानागन्तून् । अविस्पष्टैः प्रलापैः परिचिनोतीव प्रेत्य व्याहर्तव्यां पैशाचीं भाषाम् । एतत्सर्वमनुसन्धायैव राष्ट्रगोप्तारो मदिराया निर्माणं विक्रयञ्च निरुन्धन्ति, पाने दण्डञ्च विदधति ।

स्नातः क्षुधान् विविक्तस्थो धौतपादकराननः
इष्टमिष्टैस्सहाश्नीयाच्छुचि भक्तजनाहृतम् ॥

अकाले बहु चाल्पं वा भुक्तन्तु विषमाशनम्
त्रीण्येतान्यपि मृत्युं वा घोरान् व्याधीन् सृजन्ति वा ॥

मात्राशी सर्वकालं स्यान्मात्रा ह्यग्नेः प्रवर्तिका
मात्रां द्रव्याण्यपेक्षन्ते गुरूण्यपि लघून्यपि ॥

## परिशीलनम्— (6)

I ' अन्ने प्रतिष्ठिता लोका ' इति स्तूयमानस्यान्नस्य महिमानं विशदयत ।

II आहारस्य विहितः कालः कः ?

III आहारस्य मात्रा किं समैव सर्वेषाम्, उत विषमा ?
विषमा चेत् किन्निबन्धनन्तद्वैषम्यम् ? उपपादयत ।

IV आहारः कतिविधः ? कस्य कस्य किं किं फलम् ?

V मांसाशनं कुतो निषिद्धम् ?

VI मद्यस्य निर्माणं विक्रयञ्च कुतो निरुन्धन्ति राज्यरक्षाधिकृताः ?

VII हीनमात्रं भोजनं शरीरस्य बलं वर्धयितुन्न पर्याप्नोति ।
अत्र यच्छब्दतच्छब्दयोः प्रवेशने वाक्यं कीदृशं भवेत् ?

VIII यत्तच्छब्दावपहाय वाक्यं साधूकुरुत :—

(i) यदशुचि पर्युषितञ्च, तद्भोजनं तामसमुदाहरन्ति ।

(ii) भक्ष्येषु यानि वर्जनीयानि परिसंङ्ख्यायन्ते, तानि मांसादीनि तामसेष्वन्तर्भवन्ति ।

IX कर्मलकारे रूपाणि कथयत :—

(i) उत्पादयति (iii) निर्दिशति

(ii) हन्ति (iv) उदाहरति

X कर्तृलकारे रूपाणि वदत :—

| | | | |
|---|---|---|---|
| (i) | गण्यते | (iii) | शक्यते |
| (ii) | आख्यायते | (iv) | नीयते |

## गृहपाठः—(6)

### आकारान्तः स्त्रीलिंगः (जरा)

| | | |
|---|---|---|
| जरा | जरे, जरसौ | जराः, जरसः |
| हे जरे | हे जरे, हे जरसौ | हे जराः, हे जरसः |
| जराम्, जरसम् | जरे, जरसौ | जराः, जरसः |
| जरया, जरसा | जराभ्याम | जराभिः |
| जरायै, जरसे | जराभ्याम् | जराभ्यः |
| जरायाः, जरसः | जराभ्याम् | जराभ्यः |
| जरायाः, जरसः | जरयोः, जरसोः | जराणाम्, जरसाम् |
| जरायाम्, जरसि | जरयोः, जरसोः | जरासु |

### 'हन्' परस्मैपदी—लिट्

| | | |
|---|---|---|
| जघान | जघ्नतुः | जघ्नुः |
| जघ्निथ, जगन्थ | जघ्नथुः | जघ्न |
| जघान, जघन | जघ्निव | जघ्निम |

'भृ' उभयपदी—परस्मैपदे लट्।

| | | |
|---|---|---|
| बिभर्ति | बिभृतः | बिभ्रति |
| बिभर्षि | बिभृथः | बिभृथ |
| बिभर्मि | बिभृवः | बिभृमः |

'रुद्' परस्मैपदी—लोट्।

| | | |
|---|---|---|
| रोदितु | रुदिताम् | रुदन्तु |
| रुदिहि | रुदितम् | रुदित |
| रोदानि | रोदाव | रोदाम |

## सप्तमः पाठः

# विनाशकाले विपरीतबुद्धिः



शान्तिमार्गं श्रितं तापसवृत्त्या वर्तमानं मारीचं राक्षससार्वभौमो रावणः कार्यार्थी कदाचिदुपययौ । तं मारीचः सोपचारं सत्कृत्य स्वयमेवाभ्यागमने हेतुमपृच्छत् । रावणः प्रत्युवाच—

"कोसलपतिना दशरथेन ज्येष्ठपुत्रो रामो नाम राज्यान्निर्वासित इति किंवदन्ती श्रुता खलु स्याद्भवतापि । लक्ष्मणेन कनीयसा भ्रात्रा सीतया जायया च समं स पञ्चवटीमधिवसन् तत्र विचरन्तीं मे भगिनीं शूर्पणखामवजज्ञे । अङ्गच्छेदेन विरूपामकारयच्च । तत्प्रतीकारायाभियातञ्च मम भ्रातरं खरं सानुचरं जघान । अतस्स मे वध्यो भवति । सुखेन वधोपायश्च मया विचिन्तितो मनस्यास्ति । या मम स्वसुरवज्ञाया मूलम् तां तस्य प्राणेभ्योपि प्रियतरां सीतां छलेनापहरेयम् । तस्या विरहेण विवशस्य विनष्टधृतेश्च तस्य वधो नूनमीषत्करो भवेत् । सीतापहारे तु भवता मे सहायेन भवितव्यम्" इति ।

तन्निशम्य रामपराक्रमज्ञो मारीचः त्रस्तो विषण्णश्च कृताञ्जलिरेवमूचे— "हन्त महाराज! न केवलमकार्यम् अपितु कर्तुमशक्यञ्च चिकीर्षते भवान् । केनेयमुत्पादिता बुद्धिर्भवतः ? लोके प्रियवादिनस्सुलभाः । पथ्यस्य वक्ता तु दुर्लभ एव । नूनं तत्त्वतो रामं न जानीषे । अप्रमेयं किमपि तत्तेजः । पुरा विश्वामित्रस्य सत्रे अकृतास्त्रस्य ऊनद्वादशवयसोऽपि तस्य शरेण गजसहस्रस्य बलं भजन्नप्यहं शतयोजनदूरे समुद्रे पातितोऽभूवम् । एकवस्त्रश्शिखी कण्ठे कनकमालयालङ्कृतस्स शिशुरद्यापि मे हृदि भयं जनयन्नास्ते । रकारादीनि रत्नरथादीनि नामान्यपि रामत्रस्तस्य मे वित्रासं जनयन्ति । अतो

विरम प्रस्तुतादध्यवसायात् । रामस्य विप्रियं कर्तुं मतिं मा कृथाः। स हि विप्रियकर्तॄणां प्रदीप्तः प्रलयाग्निः । सीता च दुराधर्षा शिखा तस्य। छले प्रवृत्तिश्च नीचानामुचिता । न तु मानिनां भवादृशां। तया रामविरोधजनने तु तदन्तं राक्षसवंशस्य भवतश्च जीवितमिति जानीहि । तदिमां दुराशां परित्यज्य कुलं राज्यं जीवितञ्च संरक्षितुं प्रसीद । किञ्च विभीषणादीन् पुरस्कृत्य नीतिधर्मवेदिभिस्सचिवैस्सह गुणदोषौ वलाबले च निपुणं विचार्य यत्तव हितं क्षमञ्चावधार्यते, तदेव कर्तुमर्हसि। न त्वेवं स्वबुद्धिमात्रपरिकल्पितं सहसैव। अपि च नाहन्तव साहाय्यमाचरितुं शक्नोमि । जरया विक्लबः कथञ्चिदेव हि प्राणान् बिभर्मि " इति।

मारीचस्यानेन वचनेन रावणो निकामं चुक्षुभे । परुषं प्रतिवचनमूचे च — "भोः वावदूक! नाहमुपदेशं लिप्सुः गुरुमिव त्वामुपस्थितोऽस्मि । नापि कार्यस्य गुणदोषौ जिज्ञासुस्सचिवमिव। तदलमनधिकृतेन तवानपेक्षिताभिधानेन। सीतापहारे सुदृढो मम निश्चयो न शक्यते व्यावर्तयितुं ब्रह्मणापि । अपहारे त्वयास्ति किञ्चन करणीयम् । तत्कर्तुं त्वामाज्ञापयामि । मायया रजतबिन्दुभिश्चित्रः स्वर्णवर्णो मृगो भूत्वा सीतां प्रलोभयन् तस्यास्सम्मुखो विचर। सा कुतूहलिनी, 'इमं गृहीत्वा देहि' इति नूनं रामं वक्ष्यति। ग्रहणायोपसर्पन्तं रामं दूरमाकृष्य, 'हा सीते, हा लक्ष्मण' इति रामस्वरेण दीनं रुदिहि । तन्निशम्य सीतया चोदितो लक्ष्मणोपि रामपदवीमनुगमिष्यति । एवमुभयोरपक्रान्तयोरहं निरायासस्सीतामपहरिष्यामि। इदं मे त्वया कर्तव्यं साहाय्यम् । नो चेदेतत्करोषि,

त्वामहं निहनिष्यामि । तत्सत्वरमेव कार्यसिद्धये रामनिवासस्य परिसरं वा गच्छ, अनेन चन्द्रहासेन निकृत्तकण्ठो वैवस्वतस्य पुरं वा याहि" इति ।

मारीचस्तु उपस्थिते विनाशकाले पथ्योक्तिं विफलां मन्यमानो न किंचन रावणस्याप्रियं वचनं पुनरभाषत । आज्ञाया अकरणे जाल्मोयं व्यापादयिष्यति । करणे रामश्च । उभयथापि ध्रुवो मृत्युः । तत्र वरं महापुरुषस्य रामस्य हस्तेन मरणम् । एवं निश्चित्य स रावणमवदत्—यत्तवाभिमतम्, तत्करिष्यामीति । सन्तुष्टो रावणस्तं हस्ते गृहीत्वा जगाद—"भद्र ! प्रीतोऽस्मि । त्रिलोकेश्वरस्य रावणस्य प्रीतेरनुरूपं फलं प्राप्स्यसि । इतस्तावन्मिलित्वा रथेनैव गच्छावः । आसन्ने रामावासे अवतीर्य यथोक्तं कुरु । अहमवसरप्रतीक्षी स्थास्यामि" इति । अथ रथमारुह्य उभावुदचलताम् ।

उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।

## परिशीलनम्—(7)

I 'अतस्स मे वध्यो भवति' । कुतः ?

II 'मारीचस्यानेन वचनेन रावणो निकामं चुक्षुभे'
मारीचवचनं सङ्गृह्णीत ।

III ‘ तत् कर्तुं त्वामाज्ञापयामि ’ । आज्ञप्ता क्रिया का ?

IV रावणस्याज्ञां श्रुत्वा मारीचः किमकरोत् ?

V प्रयोगा विपरिणाम्यन्ताम्—

(i) त्वं रामं न जानीषे ।

(ii) लक्ष्मणो रामपद्वीमनुगमिष्यति ।

(iii) अहं निरायासस्सीतामपहरिष्यामि ।

VI शोधयत—

(i) पञ्चवट्यामधिवसन् रामः शूर्पणखामवजज्ञे ।

(ii) नाहमुपदेशं लिप्सुः गुरोरिव तवोपस्थितोऽस्मि ।

VII तुमुनः स्थाने चतुर्थीं प्रयुज्य साधु वाक्यं निष्पादयत—

(i) रामस्य विप्रियं कर्तुं मतिं मा कृथाः ।

(ii) इमां दुराशां परित्यज्य जीवितं संरक्षितुं प्रसीद ।

VIII एकं पदं ब्रूत—

(i) हन्तुं योग्यः

(ii) कर्तुमिच्छसि

(iii) लब्धुमिच्छुः

(iv) ज्ञातुमिच्छुः ।

## गृहपाठः — (7)

### नकारान्तः पुल्लिङ्गः (श्वन्)

| | | |
|---|---|---|
| श्वा | श्वानौ | श्वानः |
| हे श्वन् | हे श्वानौ | हे श्वानः |
| श्वानं | श्वानौ | शुनः |
| शुना | श्वभ्याम् | श्वभिः |
| शुने | श्वभ्याम् | श्वभ्यः |
| शुनः | श्वभ्याम् | श्वभ्यः |
| शुनः | शुनोः | शुनां |
| शुनि | शुनोः | श्वसु |

## सुभाषितानि

आरोप्यते शिला शैले यत्नेन महता यथा ।
निपात्यते क्षणेनाधस्तथात्मा गुणदोषयोः ॥ १ ॥

वनानि दहतो वह्नेः सखा भवति मारुतः ।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम् ॥ २ ॥

नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानात् शुनापि परिभूयते ॥ ३ ॥

स्वभावो नोपदेशेन शक्यते कर्तुमन्यथा ।
सुतप्तमपि पानीयं पुनर्गच्छति शीतताम् ॥ ४ ॥

तावत्प्रीतिभवेल्लोके यावद्दानं प्रदीयते ॥
वत्सः क्षीरक्षयं दृष्ट्वा परित्यजति मातरम् ॥ ५ ॥

## श्रीरामोदन्तः

आसीद्दशरथो नाम सूर्यवंशेऽथ पार्थिवः ।
भार्यास्तिस्रोपि लब्ध्वासौ तासु लेभे न सन्ततिम् ॥ १ ॥

ततस्सुमन्त्रवचनादृश्यशृङ्गं स भूपतिः ।
आनीय पुत्रकामेष्टिमारेभे सपुरोहितः ॥ २ ॥

अथाग्नेरुत्थितः कश्चित् गृहीत्वा पायसं चरुम् ।
एतत्प्राशय पत्नीस्त्वमित्युक्त्वादान्नृपाय सः ॥ ३ ॥

तत् गृहीत्वा तदैवासौ पत्नीः प्राशयदुत्सुकः ।
ताश्च तत्प्राशनादेव नृपात् गर्भमधारयन् ॥ ४ ॥

पूर्णे कालेऽथ कौसल्या सज्जनाम्भोजभास्करम् ।
अजीजनद्रामचन्द्रं कैकेयी भरतं तथा ॥ ५ ॥

ततो लक्ष्मणशत्रुघ्नौ सुमित्राजीजनत्सुतौ ।
अकारयत् पिता तेषां जातकर्मादिकं द्विजैः ॥ ६ ॥

ततो ववृधिरेऽन्योन्यं स्निग्धाश्चत्वार एव ते ।
सकलासु च विद्यासु नैपुण्यमभिलेभिरे ॥ ७ ॥

ततः कदाचिदागत्य विश्वामित्रो महामुनिः ।
ययाचे यज्ञरक्षार्थं रामं शक्तिधरोपमम् ॥ ८ ॥

वसिष्ठवचनाद्रामं लक्ष्मणेन समन्वितम् ।
कृच्छ्रेण नृपतिस्तस्य कौशिकस्य करे ददौ ॥ ९ ॥

तौ गृहीत्वा ततो गच्छन् बलामतिबलान्तथा ।
अस्त्राणि च समग्राणि ताभ्यामुपदिदेश सः ॥ १० ॥

गच्छन् सहानुजो रामः कौशिकेन प्रचोदितः ।
ताटकामवधीद्धीमान् लोकपीडनतत्पराम् ॥ ११ ॥

ततस्सिद्धाश्रमं प्राप्य कौशिकस्सहराघवः ।
अध्वरञ्च समारेभे राक्षसाश्च समागमन् ॥ १२ ॥

राघवस्तु ततोऽस्त्रेण क्षिप्त्वा मारीचमर्णवे ।
सुबाहुप्रमुखान्हत्वा यज्ञञ्चापालयन्मुनेः ॥ १३ ॥

कौशिकेन ततो रामो नीयमानस्सहानुजः ।
अहल्याशापनिर्मोक्षं कृत्वा सम्प्राप मैथिलम् ॥ १४ ॥

जनकेनार्चितो रामः कौशिकेन प्रचोदितः ।
सीतानिमित्तमानीतं बभञ्ज धनुरैश्वरम् ॥ १५ ॥

ततो दशरथं दूतैरानाय्य मिथिलाधिपः ।
रामादिभ्यस्तत्सुतेभ्यस्सीताद्याः कन्यका ददौ ॥ १६ ॥

ततो गुरुनियोगेन कृतोद्वाहस्सहानुजः ।
राघवो निर्ययौ तेन जनकेनोरुमानितः ॥ १७ ॥

तदाकर्ण्य धनुर्भङ्गमायान्तं रोषभीषणम् ।
विजित्य भार्गवं राममयोध्यां प्राप राघवः ॥ १८ ॥

ततस्सर्वजनानन्दं कुर्वाणश्चेष्टितैस्स्वकैः ।
तामध्युवास काकुत्स्थस्सीतया सहितस्सुखम् ॥ १९ ॥

एतस्मिन्नन्तरे गेहं मातुलस्य युधाजितः ।
प्रययौ भरतः प्रीतः शत्रुघ्नेन समन्वितः ॥ २० ॥

ततः प्रकृतिभिस्साकं मन्त्रयित्वा स भूपतिः ।
अभिषेकाय रामस्य समारेभे मुदान्वितः ॥ २१ ॥

कैकेयी तु महीपालं मन्थरादूषिताशया ।
वरद्वयं पुरा दत्तं ययाचे सत्यसंगरम् ॥ २२ ॥

वनवासाय रामस्य राज्याप्त्यै भरतस्य च ।
तस्या वरद्वयं कृच्छ्रादनुजज्ञे महीपतिः ॥ २३ ॥

रामन्तदैव कैकेयी वनवासाय चादिशत् ।
अनुज्ञाप्य गुरून् सर्वान् निर्ययौ च वनाय सः ॥ २४ ॥

दृष्ट्वा तन्निर्गतं सीता लक्ष्मणश्चानुजग्मतुः ।
सन्त्यज्य स्वगृहान् सर्वे पौराश्चानुययुर्द्रुतम् ॥ २५ ॥

वञ्चयित्वा तु तान् पौरान् निद्राणान्निशि राघवः ।
वाह्यमानं सुमन्त्रेण रथमारुह्य चागमत् ॥ २६ ॥

शृङ्गिवेरपुरं गत्वा गंगाकूलेऽथ राघवः ।
गुहेन सत्कृतस्तत्र निशामेकामुवास च ॥ २७ ॥

सारथिं सन्निमन्त्र्यासौ सीतालक्ष्मणसंयुतः ।
गुहेनानीतया नावा सन्ततार च जाह्नवीम् ॥ २८ ॥

भरद्वाजमुनिं प्राप्य तन्नत्वा तेन सत्कृतः ।
राघवस्तस्य निर्देशात् चित्रकूटेऽवसत्सुखम् ॥ २९ ॥

अयोध्यां तु ततो गत्वा सुमन्त्रश्शोकविह्वलः ।
राज्ञे न्यवेदयत्सर्वं राघवस्य विचेष्टितम् ॥ ३० ॥

तदाकर्ण्य सुमन्त्रोक्तं राजा दुःखविमूढधीः ।
राम रामेति विलपन् देहन्त्यक्त्वा दिवं ययौ ॥ ३१ ॥

मन्त्रिणस्तु वसिष्ठोक्त्या देहं संरक्ष्य भूपतेः ।
दूतैरानाययन् क्षिप्रं भरतं मातुलालयात् ॥ ३२ ॥

भरतस्तु मृतं श्रुत्वा पितरं कैकयीगिरा ।
संस्कारादि चकारास्य यथाविधि सहानुजः ॥ ३३ ॥

अमात्यैश्चोद्यमानोऽपि राज्याय भरतस्तदा ।
वनायैव ययौ राममानेतुं नागरैस्सह ॥ ३४ ॥

स गत्वा चित्रकूटस्थं रामं चीरजटाधरम् ।
ययाचे रक्षितुं राज्यं वसिष्ठाद्यैर्द्विजैस्सह ॥ ३५ ॥

चतुर्दश समा नीत्वा पुनरेष्याम्यहं पुरीम् ।
इत्युक्त्वा पादुके दत्वा तं रामः प्रत्ययापयत् ॥ ३६ ॥

गृहीत्वा पादुके तस्मात् भरतो दीनमानसः ।
नन्दिग्रामे स्थितस्ताभ्यां ररक्ष च वसुन्धराम् ॥ ३७ ॥

राघवस्तु गिरेस्तस्मात् गत्वाऽत्रिं समवन्दत ।
तत्पत्नी तु तदा सीतां भूषणैस्वैरभूषयत् ॥ ३८ ॥

उषित्वा तु निशामेकामाश्रमे तस्य राघवः ।
विवेश दण्डकारण्यं सीतालक्ष्मणसंयुतः ॥ ३९ ॥

व्रजन्वनेन काकुत्स्थो विराधं विधिचोदितम् ।
सदारानुजमात्मानं हरन्तमवधीत्तदा ॥ ४० ॥

शरभंगाश्रमं प्राप्य स्वर्गतिन्तस्य वीक्ष्य सः ।
प्रतिजज्ञे राक्षसानां वधं मुनिभिरर्थितः ॥ ४१ ॥

तस्मात् गत्वा सुतीक्ष्णञ्च प्रणम्यानेन पूजितः ।
अगस्त्यस्याश्रमं प्राप्य तन्ननाम रघूत्तमः ॥ ४२ ॥

रामाय वैष्णवञ्चापमैन्द्रं तूणीयुगन्तथा ।
ब्राह्मं शरञ्च खड्गञ्च प्रददौ कुम्भसम्भवः ॥ ४३ ॥

ततस्स गच्छन् काकुत्स्थस्समागम्य जटायुषम् ।
वैदेह्याः पालनायैनं श्रद्दधे पितृवल्लभम् ॥ ४४ ॥

ततः पञ्चवटीं प्राप्य तत्र लक्ष्मणनिर्मिताम् ।
पर्णशालामध्युवास सीतया सहितस्सुखम् ॥ ४५ ॥

---

DVK Library
* 1 1 0 1 0 0 2 6 *
T38 K45

PRINTED BY THE S.G.P. AT THE GOVERNMENT PRESS
TRIVANDRUM, 1964.

# KERALA READER SANSKRIT

## III

### Part A

(For Academic and Sanskrit Schools)

STANDARD VII

1964

T38
K45

Indic Digital Archive Foundation
gpura.org